# संस्कृतवार्ता:

दिनाङ्कः 08/10/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- नवदेहल्याः यशोभूमौ इण्डिया-मोबाईल-काङ्ग्रेस् इत्यस्य नवमसंस्करणस्य उद्घाटनावसरे भाषमाणः प्रधानमन्त्री नरेन्द्र मोदी अवदत् यत्, भारते डिजिटल्-सम्पर्कः विलासितायै नास्ति अपितु प्रत्येकनागरिकस्य जीवनस्य अभिन्नः भागः अस्ति।
- प्रधानमन्त्री अद्य मुम्बै-नगरे नवी-मुम्बै-अन्ताराष्ट्रिय-विमानस्थानकस्य प्रथम-चरणस्य अथ अन्यानां सम्पर्क-परियोजनानाञ्च उद्घाटनम् अकरोत्।
- बिहारराज्यस्य विधानसभा-निर्वाचनात् पूर्वं एन्. डी. ए. अथ महा-गठबन्धनेति दलसमूहयोर्मध्ये आसनविभाजनस्य विषये गतिरोधः अनुवर्तते।
- धातु-जैविक-संरचनायाः विकासाय अमेरिकादेशस्य, जापान्-देशस्य, आस्ट्रेलिया-देशस्य च त्रयः वैज्ञानिकाः अस्य वर्षस्य रसायनशास्त्रस्य नोबेल्-पुरस्कारं प्राप्तवन्तः।
- महिलानां ओ. डि. आई. क्रिकेट्-विश्वकप् इति क्रीडायां आस्ट्रेलिया-देशं विरुध्य पाकिस्तान्-देशः क्षेत्ररक्षणस्य निर्णयम् अकरोत्।

------------------------------

<u>प्रधानमन्त्री-भारतीय-मोबाईल काङ्ग्रेस</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् देशे डिजिटल-सम्पर्कः न तु विशेषाधिकारः न च विलासः अस्ति अपितु प्रत्येकस्य नागरिकस्य जीवनस्य अभिन्नः भागः अस्ति। श्रीमोदी अद्य नवदेहल्ल्याः यशोभूमौ एशिया-महाद्वीपस्य बृहत्तमस्य दूरसञ्चार-माध्यम-तन्त्रज्ञान-कार्यक्रमस्य नवमस्य संस्करणस्य इण्डिया-मोबाईल-काङ्ग्रेस-इत्यस्य उद्घाटनानन्तरं सम्बोधयन् आसीत्।

श्रीमोदी अवदत् यत् देशः पूर्वं 2जी इत्यस्य समस्यां सम्मुखीकृतवान्, अधुना प्रायः प्रत्येकस्मिन् मण्डले 5जी इत्यस्य व्याप्तिः अस्ति।

प्रधानमंत्रीः अवदत् यत्, भारतेन सद्यः एव स्वस्य मेड-इन-इण्डिया 4जि-स्टैक इत्यस्य आरम्भः कृतः, यद्धि देशस्य प्रमुखं स्वदेशीयं साफल्यम् अस्ति।

अस्मिन् अवसरे सम्प्रेषणमन्त्री ज्योतिरादित्यसिन्धिया अवदत् यत् भारतं अधुना विश्वस्य डिजिटल इति क्षेत्रस्य ध्वजवाहकः अस्ति। चतुर्दिवसीयेऽस्मिन् कार्यक्रमे दूरसञ्चारक्षेत्रे उदयोन्मुखप्रौद्योगिकीषु च नवीनतमप्रगतिः प्रदर्श्यते, येन वैश्विकप्रमुखाः, नीतिनिर्मातारः, उद्योगविशेषज्ञाः, आविष्कर्तारश्च सम्मिलिताः भविष्यन्ति।

------------------------------

**मोदी-यू. के. प्रधानमन्त्री**

मुम्बई-नगरे स्वस्य भ्रमणस्य प्रथमदिने अद्य वाणिज्यनेतॄन् सम्बोधयन् युनैटेड् किङ्ग्डम्-देशस्य प्रधानमन्त्री सर् कीर स्टार्मर्-वर्यः अवदत् यत् भारत-यू. के. मुक्तव्यापार-सन्धिः इति यूरोपियन्-यूनियन इत्यतः निष्कासनात् परं युनैटेड् किङ्ग्डम्-देशेन हस्ताक्षरितः बृहत्तमः व्यवहारः अस्तीति। सः इत्यपि अकथयत् यत् एतत् युनैटेड् किङ्ग्डम् इत्यनेन भारतं प्रति प्रेषितं बृहत्तमं वाणिज्याभियानम् अस्ति। गत वर्षे जुलै-मासे प्रधानमन्त्री-मोदी-वर्यस्य लण्डन्-यात्रायाः समये हस्ताक्षरितं स्वतन्त्र-व्यापार-सन्धिः उभयदेशयोः मध्ये द्विपाक्षिकव्यापारं प्रतिवर्षं सार्धपञ्चविंशति- बिलियन् पौण्ड्-मितं वर्धयिष्यतीति अपेक्ष्यते।

------------------------------

**मुम्बई/ प्रधानमन्त्रिणः भ्रमणम् -**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवी-मुम्बई-अन्ताराष्ट्रिय-विमानस्थानकस्य प्रथम-चरणस्य, अन्य-सम्पर्क-परियोजनानाञ्च उद्घाटनं कृतम्। एतैः प्रकल्पैः विकासस्य अवसराणाञ्च वैश्विककेन्द्ररूपेण नगरस्यास्य स्थानं सुदृढं भविष्यतीति प्रधानमन्त्री अवदत्। अत्रान्तरे, युनटेड् किङ्ग्डम्-देशस्य प्रधानमन्त्री सर कीर स्टार्मर अपि अद्य प्रातः भारतस्य प्रथम-

आधिकारिकयात्रायै मुम्ब-नगरं प्राप्तवान्। एतयोः द्विदिवसयोः भ्रमणावसरे श्रीमोदी, श्रीकीरश्च द्वैपाक्षिक-चर्चासु भागं ग्रहीष्यतः, अथ च मुम्बै-नगरस्य जियोवरिया-केन्द्रे वैश्विक-फिन्टॅक्-इत्युत्सवस्य द्वितीये संस्करणे भागं भजिष्यतः।

-------------------------------

## बिहारराजनीतिः

बिहार-विधानसभा-निर्वाचनात् पूर्वं राष्ट्रिय-जनतांत्रिक-सङ्घटनस्य महा-सङ्घटनम् इत्येतयोर्मध्ये आसनविभाजनस्य विषये गतिरोधः अनुवर्तते। एतन्मध्ये निर्वाचनायोगेन शत-निमेषेषु परिवादानां शीघ्रनिवारणाय राज्येऽस्मिन् चतुर्विंशत्यधिकाष्टशतसंख्यकानि आकस्मिक-दलानि नियुक्तानि सन्ति। एकस्य केन्द्रीय-परिवाद-निरीक्षण-समूहस्यापि स्थापना कृतास्ति, यस्मिन् 1950 इति दूरभाष-केन्द्र-सङ्ख्या च घोषितास्ति।

-------------------------------

## नोबल

धातु-जैविक-संरचनायाः विकासाय अमेरिकादेशस्य ओमर एम. यागी, जापान्-देशस्य सुसुमु कितागावा, आस्ट्रेलिया-देशस्य रिचर्डराब्सन इत्येते त्रयः वैज्ञानिकाः अस्य वर्षस्य रसायनशास्त्रस्य नोबेल्-पुरस्कारं प्राप्तवन्तः।

-------------------------------

## भारतीयसंसदः

संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां देशपक्षतः प्रतिनिधित्वं कर्तुम् एकं बहुदलीय-भारतीयसंसदः प्रतिनिधिदलं ह्यः न्यूयार्क-नगरं सम्प्राप्तम्। प्रथमदलस्य नेतृत्वं भाजपा-सदस्येन, एकराष्ट्र-एक-निर्वाचनेति विषयस्य संयुक्तसंसदीयसमित्याः अध्यक्षेण पी. पी. चौधरी वर्येण कृतम्। विभिन्नराजनैतिकदलानां पञ्चदश संसदसदस्यैः युक्तः अयं समूहः अस्य मासस्य चतुर्दश-

दिनाङ्कपर्यन्तं न्यूयार्क-नगरे भविष्यति। अस्य मासस्यान्ते पञ्चदश- सांसदानां द्वितीय: समूहः संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां भागं ग्रहीतुं निश्चितः अस्ति। इतः पूर्वं, अटल बिहारी वाजपेयी, एल. के. आड्वाणी इत्यादयः वरिष्ठनेतारः मञ्चेऽस्मिन् भारतस्य प्रातिनिध्यम् कृतवन्तः।

------------------------------

## वीपी-जयप्रकाश नारायण

उपराष्ट्रपतिः सी. पी. राधाकृष्णन इत्येषः स्वातन्त्र्ययोद्धुः लोकनायक-जयप्रकाश-नारायणस्य पुण्यतिथ्यां श्रद्धाञ्जलिम् अर्पितवान्। सामाजिक-प्रसार-माध्यमे उपराष्ट्रपतिः आपत्कालिके काले जयप्रकाश-नारायणस्य योगदानं स्मरन् अवदत् यत् सः प्रशासनस्य सर्वाधिकारवादिकविचारं विरुध्य ऐतिहासिकस्य जनान्दोलनस्य नेतृत्वं कृतवान्, येन जनाः लोकतन्त्रस्य, नागरिकस्वातन्त्र्यस्य, संवैधानिकमूल्यानाञ्च रक्षणार्थं प्रेरिताः अभवन्। उपराष्ट्रपतिः नवदेहल्ल्याः संविधान-सदने लोकनायक-जयप्रकाश-नारायणं प्रति पुष्पांजलिम् अर्पितवान्। गृहमन्त्री अमितशाहः अपि स्वातन्त्र्ययोद्धुः पुण्यतिथ्यां श्रद्धाञ्जलिम् अर्पितवान्।

------------------------------

## वायु-सेना-दिवसः

अद्य राष्ट्रं भारतीय-वायुसेनायाः त्रिनवतितमं वार्षिकोत्सवम् आचरति। द्वात्रिंशदुत्तरैकोनविंशतितमे वर्षे अक्टूबर-मासस्य अष्टमे दिनाङ्के अस्याः सेनायाः स्थापना अजायत्। अद्य गाजियाबादस्य हिण्डन-वायुस्थानके जनसमूहं सम्बोधयन् वायुसेनायाः प्रमुखः एयर-चीफ-मार्शल अमर-प्रीत-सिङ्हः अवदत् यत्, आपरेशन-सिन्दूर इत्यस्य समये भारतीय-वायुदलेन महत्वपूर्णा भूमिका निर्वोढा।

अद्य प्रातःकाले, रक्षाध्यक्षः जनरल अनिल चौहानः, स्थलसेनाध्यक्षः जनरल-उपेन्द्र द्विवेदी नौसेनाध्यक्षः एड्मिरल दिनेश के. त्रिपाठी, वायुसेनाध्यक्षश्च नवदेहल्ल्याः राष्ट्रिय-युद्धस्मारके वीरयोद्धृभ्यः श्रद्धाञ्जलिम् अर्पितवन्तः। राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् इत्येषः, प्रधानमन्त्री नरेन्द्रमोदी च वायुसेनादिवसावसरे सर्वेभ्यः वायुसैनिकेभ्यः, पूर्वसैनिकेभ्यः, तेषां परिजनेभ्यश्च शुभाशयान् अयच्छन्।

------------------------------

**जे-के-वैष्णो देवी यात्रा**

जम्मू-कश्मीर-प्रदेशे प्रतिकूल-ऋतोः कारणेन निरन्तरतया दिनत्रयेभ्यः स्थगिता श्रीमातुः वैष्णोदेव्याः तीर्थयात्रा पुनः आरब्धा अस्ति। त्रिकुटा-पर्वतप्रदेशे प्रचण्डवृष्टेः, भूस्खलनस्य च सम्भावनया पवित्र-गुहा-तीर्थस्य तीर्थयात्रा स्थगिता आसीत्।

------------------------------

**कैलिफोर्निया-दीपावल्यावकाशः**

कैलिफोर्निया-राज्यं आधिकारिकरूपेण दीपावली-उत्सवाय राज्ये अवकाशदिवसरूपेण अङ्गीकृतवत्, येन संयुक्तराज्यामेरिकादेशे पेन्सिल्वेनिया-कनेक्टिकट्-राज्ययोः अनन्तरं तृतीयं राज्यम् अभवत्, यत्र दीपावली-उत्सवः राज्ये विरामदिवसत्वेन घोषितः।

------------------------------

**क्रिकेट क्रीडा**

महिलानां ओ. डि. आई. क्रिकेट्-विश्वकप इति क्रीडायां आस्ट्रेलिया-देशं विरुध्य पाकिस्तान्-देशः क्षेत्ररक्षणस्य विकल्पं स्वीकृत्य कन्दुकक्षेपणं करोति।

।।इति वार्ता:।।